मौलिन्यो वरदास्तद्वत् कर्त्तव्या बालकान्विताः ।
भक्त्या पञ्चपलादूर्द्धमासहस्रात् प्रकल्पयेत्” ॥

मौलिन्यो मुकुटवत्यः । वरदाः प्रसन्नमूर्त्तयः । बालकान्विताः क्रोड़निहितपुत्रकाः । एतेन क्रोड़निविष्टवामकरच्छतपुत्रका दक्षिणहस्तविधृत यथोक्तशस्त्राः प्रसन्नमूर्त्तयो बद्धमुकुटाः सवाहना घटनीयाः । अनुक्तवाहनानान्तु ब्राह्म्यामैयीनैर्ऋतीनान्तत्तल्लोकपालवाहनानि । लोकपालानुसारिण्य इति श्रुतेः । तेन हंसारूढ़ा ब्राह्मी छागारूढ़ामैयी नरारूढ़ा नैर्ऋती घटनीया । अनन्तस्य तु क्वचिदाहनादर्शनात् अनन्तशक्तिर्व्वाहनशून्यैव कर्त्तव्या ॥

“सर्व्वासामुपरिष्टाच्च पञ्चवर्णवितानकम् ।
धेनवो दशकुम्भाश्च वस्त्रयुग्मानि चैव हि ॥
मध्यमे द्वे तु गुरवे ऋत्विग्भ्योऽन्यास्तथैव च ।
ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो बुधः ।
त्रिः प्रदक्षिणमावृत्य मन्त्रमेतमुदीरयेत्” ॥

“नमो नमः पापविनाशिनीभ्यो
ब्रह्माण्डलोकेश्वरपालनीभ्यः ।
आशंसिताधिक्यफलप्रदाभ्यो
दिग्भ्यस्तथा कल्पलतावधूभ्यः ॥
इति सकलदिगङ्गनाप्रदानं
भवभयसूदनकारि यः करोति ।
अभिमतफलदे स नाकलोके
वसति पितामहवत्सराणि त्रिंशत् ॥
पितृशतमथ तारयेद्भवाब्धे-
र्गुरुदुरितौघविघातशुद्धदेहम् ।
सुरपतिवनितासहस्रसंघः
परिवृतमम्बुजयोद्भवाभिनन्द्यम् ॥
इति विधानमिदं सदिगङ्गना
कनककल्पलताविनिवेदने ।
पठति यः स्मरतीह तथेक्षते
स पदमेति पुरन्दरसेवितम्” ॥ * ॥

अथ यजमानः समुपजातमहाकल्पलतामहादानदानेच्छः तुलापुरुषलिखितं खड्गचर्म्म मयाच्छन्नसन्नाहतुलापुरुषस्थापनीयहरिप्रतिमासालङ्कारतुलाहस्त्याद्यप्रतिमावद्भिः सर्व्वसम्भारमधिकलेन पलपञ्चकादूर्द्धपलसहस्रावधियथेष्टहेमनिर्म्मिता स्थानस्थानघटितविद्याधरकिन्नरमिथुनसिद्धगणाः पक्षवाद्यनिर्म्मितयथेच्छाकृतिफलकुसुमपल्लवद्हशोभितपद्दिव्याः सिद्धहस्तासक्तयथेच्छसद्युक्ताहारसहिता नानाविधचित्रनेत्रादिवस्त्रोपशोभिता दशलताः । तासामधः स्थापनार्थं यथेच्छहेमयन्त्रोत्खाटिता यथोक्तरूपा ब्राह्मग्रादिदशप्रतिमाः । तदारोपणार्थं लवणगुड़हरिद्राक्षतखुलघृतक्षीरशर्करातिलनवनीतानि । लतापार्श्वस्थापनार्थं धेनुदशकं कुम्भदशकञ्च वस्त्रयुगदशकञ्चोत्पादयेत् । ततो यजमानस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्व्वतरदिने गुर्व्वृत्विग्यजमानजापकास्तुलापुरुषवत्तृहविष्यभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने महाकल्पलतापदं निवेश्य निवेदनं सङ्कल्पञ्च कुर्य्युः । अपरदिने च यजमानः पूर्व्ववद्गोविन्दाद्याराधनादिमधुपर्कदानान्तं कर्म्म गोविन्दाद्यभ्यर्च्चनब्राह्मणानुज्ञापनदानसङ्कल्पपुण्याहादिवाचनवरणवाक्येषु तुलापुरुषपदस्थाने महाकल्पलतापदं प्रक्षिप्य कुर्य्यात् । ततो गुर्व्वृत्विग्यजमानजापका उपवसेयुः । अपरदिने कृतनित्यास्तुलापुरुषवदग्निस्थापनादि मध्यब्राह्मणवाचनान्तं कर्म्म यथायथं कुर्य्युः । एवञ्च मध्यब्राह्मणवचनान्तं कर्म्म तुलापुरुषग्रन्थमनुसन्धायानुष्ठातव्यम् । तत ऋत्विजः प्रधानवेद्यां लिखितचक्रोपरि लतानां मध्ये पूर्व्वादिदिक्क्रमेणाष्टौ लताः समारोप्य लतामण्डलमध्ये लताद्वयञ्चारोप्य तदधो लवणं दत्त्वा तत्र ब्राह्मीमनन्तशक्तिञ्च आरोप्य पूर्व्वादिदिक्क्रमारोपिताष्टलताधःक्रमेण गुड़ादिद्रव्याणि दत्त्वा तेषु क्रमात् कुलिशायुधादिशक्तिप्रतिमाः समारोपयेयुः । लतापार्श्वे दशधेनूः पूर्णकुम्भदशकं दशवस्त्रयुगानि च स्थापयेयुः । ततो मङ्गलगीतवाद्यवन्दिघोषेषु सत्सु कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नापयेयुः । ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्व्वालङ्कारः पुष्पाञ्जलिमादाय लताः त्रिः प्रदक्षिणीकृत्य नमो नमः पापविनाशिनीभ्य इत्यादिमन्त्रेण पुष्पाञ्जलिनाभ्यर्च्य गुर्व्वृत्विग्भ्यो दद्यात् । तद्यथा । ॐ अद्यामुकामुकसगोत्रेभ्यः अमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्म्मभ्यो युष्मभ्यं मत्स्यपुराणोक्तकल्पलतामहादानदानफलप्राप्तिकामोऽहं मत्स्यपुराणोक्तभागयथरक्षयैता लवणगुड़हरिद्रातण्डुलघृतक्षीरशर्करातिलनवनीतार्पितकलधौतब्रह्मानन्तकुलिशायुधवह्निशमननिर्ऋतिवरुणवायुसोममहेश्वरशक्तिप्रतिमासहिताः पञ्चवर्णवितानकधेनुदशककुम्भदशकवसनयुगदशकान्विताः दशकल्पलता सम्प्रददे ॥ प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठेयुः । ततो गुरुः कल्पलतेयं विष्णुदैवतेति ब्रूयात् । ऋत्विजस्तु प्रत्येकं कल्पलतेयं विष्णुदैवतेति ब्रूयुः । ततो यथाशक्तं कामस्तुतिं पठेयुः । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामिमां यदुत्पत्तियोग्यां भूमिमेतानि च रत्नानि सम्प्रददे ॥ ब्राह्मणाः स्वस्तीत्युक्त्वा कल्पलताः स्पृशेयुः । ततस्तुलापुरुषवज्जापकेभ्यो दक्षिणां दीनानाथादितर्पणं ब्राह्मणवाचनं त्वरया कल्पलतानां यथायथं प्रतिपादनञ्च कुर्य्यात् । इति कल्पलतामहादानं समाप्तम् । इति दानसागरः ॥

कल्पवृक्षः, पुं, कल्पस्य सङ्कल्पस्य दाता वृक्षः । कल्पस्थायी वृक्ष इति वा । इति सारसुन्दरी । देवतरुः । इत्यमरः । १ । १ । ५३ ॥ (यथा, दानसागरे ।
“नमस्ते कल्पवृक्षाय चिन्तितान्नप्रदाय च ।
विश्वम्भराय देवाय नमस्ते विश्वमूर्त्तये” ॥)

कल्पान्तः, पुं, (कल्पस्य अन्तो यत्र ।) ब्रह्मणो दिनान्तः । प्रलयः । इत्यमरः । १ । ४ । २२ ॥ (यथा, गोः रामायणे ३ । १० । ४ ।
“उपवासरतास्त्वेव जले कल्पान्तवासिनः” ॥)

कल्पितः, पुं, (कल्प्यते सज्जीक्रियते असौ । क्लृप् + णिच् + कर्म्मणि क्तः ।) सज्जितहस्ती । इति हेमचन्द्रः ॥ रचिते त्रि ॥ (यथा, महानिर्व्वाणोक्ततत्त्वज्ञाननिर्णये ।
“ब्रह्मादितृणपर्य्यन्तं मायया कल्पितं जगत् ।
सत्यमेकं परं ब्रह्म विदित्वैवं सुखी भवेत्” ॥)

कल्मषं, क्ली, (कर्म्म शुभकर्म्म स्यति नाशयति रस्य लत्वे षत्वे च पृषोदरादित्वात् साधुः ।) पापम् । इत्यमरः । १ । ४ । २३ ॥ (यथा, मनुः १२ । २२ ।
“यामीस्ता यातनाः प्राप्य सजीवो वीतकल्मषः ।
तान्येव पञ्चभूतानि पुनरप्येति भागशः” ॥)
हस्तपुच्छम् । इति त्रिकाण्डशेषः ॥ (मालिन्यम् । यथा, रामायणे २ । ३६ । २७ ।
“न हि कञ्चन पश्यामो राघवस्यागुणं वयम् ।
दुर्लभोऽह्यस्य निरयः शशाङ्कस्येव कल्मषम्” ॥)

कल्मषः, पुं, (कर्म्म शुभकर्म्म स्यति नाशयति । कर्म्म + सो + कः । रस्यः लः सस्य षत्वञ्च निपातनात् ।) नरकविशेषः । इति मेदिनी ॥ मलिने त्रि । इति जटाधरः ॥

कल्माषः, पुं, (कलयति इति क्विप् कल् । माषयति स्वभासा अभिभवति अन्यवर्णान् । मष् हिंसायां णिच् + अच् । कल् चासौ माषश्चेति ।) चित्रवर्णः । तद्वति त्रि । इत्यमरः । १ । ५ । १७ ॥ कृष्णपाण्डुरवर्णः । कृष्णवर्णः । (कलं शुभकर्म्म माषयति हिनस्ति । कल + मष् + णिच् + अच् वा ।) राक्षसः ॥ इति मेदिनी ॥ गन्धशालः । इति राजनिर्घण्टः ॥ (नागविशेषः । यथा, महाभारते १ । ३५ । ७ ।
“नीलानीलौ तथा नागौ कल्माषशवलौ तथा” ॥)

कल्माषकण्ठः, पुं, (कल्माषः कृष्णवर्णः कण्ठो यस्य ।) शिवः । इति हारावली ॥

कल्माषपादः, पुं, (कल्माषौ शापजलप्रक्षेपणात् कृष्णवर्णौ पादौ यस्य ।) सौदासराजः । इति श्रीभागवतम् ॥ (यथा, महाभारते १ । १७७ । १ ।
“कल्माषपाद इत्येवं लोके राजा बभूव ह ।
इक्ष्वाकुवंशजः पार्थ तेजसासदृशो भुवि” ॥)
अस्य यथा कल्माषपादत्वं जातं तदुच्यते । नलसखस्य ऋतुपर्णस्य वंशजः सौदासनामा नृपतिः पुरा मृगयां चरन् एकं राक्षसमवधीत् । अस्य रक्षसो भ्राता तु वैरशोधनं चिकीर्षुः सूदरूपधरोऽस्य राज्ञो गृहं प्रत्युवास । एकदा तु असौ राक्षसः भोक्तुकामाय नृपतेः सौदासस्य गुरवे वशिष्ठाय नरामिषं पक्त्वा ददौ । वशिष्ठस्तु तदभोज्यं दृष्ट्वातिक्रुद्धः “राक्षसो भविष्यतीति” राजानमशपत् । राजा तु शापवृत्तान्तं विदित्वा विनापराधेन प्रदत्तः शापः इति विचिन्त्य जलमादाय गुरुं प्रतिशप्तुं समुद्यतः । एतस्मिन्नन्तरेऽस्य पत्नी मदयन्ती दृष्ट्वैवमकरणीयोद्यतं पतिं निवारयामास । राजा तु तया निवारितः स्वपादयोः शापजलं प्रक्षिप्तवान् । एतदारभ्यायं पादयोः कल्माषतां प्राप्तवान् ॥ अस्य अन्या विस्तृतिस्तु भागवते ९ । ९ अध्याये, तथा महाभारते १ । १७७ अध्याये द्रष्टव्या ॥)

कल्यं, क्ली, (कल्यते आगम्यते । कल गतौ + कर्म्मणि यत् । प्रत्यूषः । इत्यमरः । १ । ४ । २ ॥ (यथा,